# श्रीरामस्य चरित्र चित्रणम्

श्रीरामचन्द्रः 'उत्तररामचरितस्य' दिव्यादिव्य धीरोदात्त नायकोऽस्ति । रामः भगवतः विष्णोः अवतारः मन्यते । लोके प्रतिष्ठितायाः स्व कुल मर्यादायाः रक्षणाय सकलजीवन प्रदानेन रामं 'मर्यादा पुरुषोत्तमः' मन्यन्ते मनीषिणः। भवभूतेः उत्तररामचरिते रामः आदर्श भर्तुः, आदर्शपितुः आदर्शराज्ञस्च रूपे चित्रितोऽस्ति। रामः धीरोदात्तनायकस्य गुणानुसारं स्वसम्मानं कुत्रचिदपि न इच्छति यथा – प्रथमेऽङ्के कञ्चुकी 'रामभद्र...' इत्युक्त्वा किञ्चित् शङ्कते, महाराज कथयति तदा रामः कथयति – 'आर्य! ननु 'रामभद्र' इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य।' तथा च चित्रदर्शनावसरे यदा लक्ष्मणः परशुरामस्य मानमर्दनस्य प्रसङ्गं वर्णितुमिच्छति तदैव रामः तं निवृत्य अन्यत् चित्रं दर्शयति।

रामः एकपत्नीव्रत धर्मस्य साक्षात् रूपो एव अस्ति। सीतायाः निर्वासनानन्तरं रामः अश्वमेधयज्ञे सीतायाः हिरण्मयी प्रतिकृतिं एव सहधर्मचारिणीरूपेण स्वीकरोति, यच्छ्रुत्वा वनदेवता

वासन्ती कथयति—

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को विज्ञातुमर्हति ॥

~~अस्मिन्~~ सीतानिर्वासनानन्तरं रामस्य ईदृशी अवस्था संजाता सा तु तृतीयेऽङ्के दृश्यते एव, रामः सीतायाः वियोग-दुःखेन सम्पीडितो भूत्वा वासन्तीं कथयति —

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥

रामः एकः ईदृशः आदर्शनृपोऽस्ति यस्य प्रजानुरञ्जनमेव महान् व्रतोऽस्ति, यस्य पूरणे सः अष्टावक्रं सान्त्वयन् कथयति—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥

तथा च प्रजानुरञ्जनाय स्वजीवनस्य प्रियतमवस्तुनः स्वप्रियतमायाः सीतायाः अपि परित्यागः ~~करोति~~ । कृत्वा स्वजीवनस्य समग्रसुखानां तिलाञ्जलिं ददाति ।

सकरुणो भूत्वाऽपि लोकानुरञ्जनार्थैव शम्बूके प्रहरणे शङ्क्यमानं स्वहस्तमेव उपालम्भयति —

"रे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि निर्भरगर्भखिन्न -
सीताविवासनपटोः करुणा कुतस्ते ॥"

पञ्चवटीप्रवेशानन्तरं रामस्य स आत्मग्लानिः अत्यधिक तीव्रो भवति —

"यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे-
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं -
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा"

लोकानुरञ्जनाय सीतायाः निर्वासितेऽपि सीतायाः प्रति रामस्य स्नेहः न्यूनः न जातः अपितु ~~प्रत्युत~~ सः अनुरागः उत्तरोत्तर अतिप्रगाढः भवति । सीता छायाङ्के स्पष्टो दृश्यते यत् रामस्य मूर्च्छनम् सीतायाः करस्पर्शेन च सञ्जीवनम् इत्यादिभिः स्पष्टो भवति यत् रामस्य हृदये सीतायाः प्रति कियत् प्रेमः अस्ति ।

DATE : / /

रामस्य स्नेहः सामान्य स्नेहरिव उद्दण्डः, उच्छृंखलः नास्ति, सः मर्यादया बन्धोऽस्ति तथाच पुटपाकरीत्या अन्तः एव ज्वलितो भवति पुनश्च कदाचित् प्रलापैः प्रकटितो भवति।

षष्ठेऽङ्के युद्धक्षेत्रे कुशलवौ च दृष्ट्वा तौ सीतापुत्रौ भवितु सम्भावनया रामस्य हृदय वात्सल्येन पूरितो भवति। संक्षेपेण भवभूतेः रामः आदर्श नृपः आदर्श पतिः आदर्श जनकः सर्वः एव अस्ति।